**तृतीयः अध्यायः**

# सर्वकारः किम् अस्ति ?

भवन्तः 'सर्वकारः' इति शब्दस्य विषये अनेकधा श्रुतवन्तः स्युः। अस्मिन् पाठे भवत्यः सर्वकारस्य विषये पठिष्यन्ति यत् सर्वकारः किं अस्ति ? अस्माकं जीवने अस्य कियती महत्वपूर्ण-भूमिका अस्ति। सः कीदृशं दायित्वं निर्वहति तथा च निर्णयान् कथं स्वीकरोति ? विविधसर्वकाराणां विषये यथा लोकतान्त्रिकसर्वकारस्य राजतंत्रीयसर्वकारस्य च मध्ये किम् अन्तरम् अस्ति ? आगच्छन्तु, पठित्वा जानीमः .....

**सर्वकारात् कर्मकराणाम् अधिकाराणां रक्षायाः याचना**

**जलौघपीडितानां कृते सर्वकारस्य पक्षतः पुनर्वाससामग्री**

**अङ्गारविद्युद्विभागयोः पुनर्गठनस्य पक्षे अस्ति सर्वकारः**

**पलाण्डोः मूल्ये वृद्धिः–सर्वकारेण पलाण्डोः मुल्यं निर्धारितम्**

**सर्वोच्च-न्यायालयस्य कृते इतोऽपि पञ्च न्यायाधीशाः**

**सर्वकारेण १५००० इत्यतः अधिकाः ग्रामाः अनावृष्टिग्रस्ताः इति घोषिताः**

उपरि प्रदत्तान् समाचारपत्रस्य मुख्यांशान् पश्यन्तु। एतेषु सर्वकारस्य येषां कार्याणां विषये चर्चा क्रियते तेषां सूचीं कुर्वन्तु।

१      २

३      ४

किं सर्वकारस्य कार्यं बहुविस्तृतं नास्ति? भवताम् अनुसारं सर्वकारः किमस्ति? कक्षायाम् एतस्मिन् विषये चर्चां कुर्वन्तु।

प्रत्येकं देशस्य कृते विभिन्ननिर्णयान् स्वीकर्तुं कार्याणि च कर्तुं सर्वकारस्य आवश्यकता भवति। एते निर्णयाः अनेक-विषय-सम्बद्धाः भवितुं अर्हन्ति-यथा विद्यालयाः राजमार्गाः च कुत्र निर्मातव्याः, यदा किञ्चित् वस्तु महार्घं जायते तदा तस्य मूल्यं न्यूनं कथं स्यात् अथवा विद्युतः आपूर्तिः कथं वर्धेत । सर्वकारः अनेकेषां-सामाजिकविषयाणां क्रियान्वयनं करोति उदाहरणार्थं सर्वकारः निर्धनानां साहाय्यं कर्तुं

कार्यक्रमान् चालयति । एतदतिरिच्य सः अन्यानि महत्त्वपूर्णानि कार्याणि अपि करोति, यथा पत्रालय-सेवा-सञ्चालनं तथा च रेलसेवा-सञ्चालनम्।

सर्वकारस्य कर्तव्यं देशस्य सीमानां सुरक्षा तथा अपरैः देशैः सह शान्तिपूर्ण-सम्बन्ध-स्थापनमपि अस्ति । तस्य कर्तव्यम् इदमपि अस्ति यत् देशस्य सर्वे नागरिकाः पर्याप्तमात्रया भोजनं सम्यक् स्वास्थ्य-सौविध्यानि च प्राप्नुयुः यदा प्राकृतिकविपदः समायान्ति यथा सुनामीसमस्या अथवा भूकम्पनकारणात् समस्याः भवन्ति तस्मिन् काले मुख्यरूपेण सर्वकारः एव पीडितानां जनानां सहायतां करोति । यदि कुत्रचित् कश्चित् विवादः भवति अथवा कश्चित् अपराधं करोति तदा जनाः न्यायालयं गच्छन्ति न्यायालयः अपि सर्वकारस्य एव अङ्गभूतः अस्ति।



Bharat Petroleum

*कानिचन उदाहरणानि यानि सर्वकारस्य अङ्गभूतानि सन्ति- सर्वोच्चन्यायालयः, भारतपेट्रोलियमः, भारतीयरेलः*

प्रायेण भवताम् एतत् सर्वं श्रुत्वा पठित्वा वा आश्चर्यं स्यात् यत् सर्वकारः एतावन्ति कार्याणि कथं कर्तुं पारयति तथा च सर्वकारस्य कृते एतानि कार्याणि किमर्थम् आवश्यकानि सन्ति । यदा जनाः सम्भूय तिष्ठन्ति अथवा सम्भूय कार्याणि कुर्वन्ति तदा कस्याश्चित् व्यवस्थायाः आवश्यकता भवति यस्याः आवश्यकनिर्णयाः स्वीक्रियेरन्।

किं भवन्तः सर्वकारस्य एतदृशानां कार्याणां कानिचन उदाहरणानि दातुं शक्नुवन्ति येषां चर्चा उपरि न कृता अस्ति ?

१

२

३

केषाञ्चित् निर्णयाणाम् आवश्यकता भवति ये च सर्वेषाम् कृते भवन्ति । उदाहरणार्थं संसाधनानां नियन्त्रणस्य आवश्यकता भवति तथा च देशस्य सीमानां सुरक्षा करणीया भवति यतोहि जनाः



आत्मानं सुरक्षिताः अनुभवेयुः । जनानां कृते सर्वकारः बहुविधानि कार्याणि करोति। सः नियमान् रचयति निर्णयान् च स्वीकरोति तथा च स्वसीमायां ये जनाः वसन्ति तेषु तेषां नियमानां क्रियान्वयनं करोति।

**सर्वकारस्य स्तराः**

अधुना भवन्तः भवत्यः यत् सर्वकारः केषां केषां पृथक् पृथक् कार्याणां कृते उत्तरदायी अस्ति तर्हि किं भवत्यः चिन्तयितुं शक्नुवन्ति यत् सर्वकारः एतेषां सर्वेषां कार्याणां कृते व्यवस्थां कथं करोति? वस्तुतः सर्वकारः भिन्नेषु भिन्नेषु स्तरेषु कार्यं करोति- स्थानीयस्तरे राज्यस्तरे अपि च राष्ट्रियस्तरे । स्थानीयस्तरस्य अभिप्रायः भवतां ग्राम-नगरोपनगराभ्यां च अस्ति । राज्यस्तरेणाभिप्रायः अस्ति यः सम्पूर्णस्य राज्यस्य विषये उत्तरदायी स्यात् यथा हरियाणायाः असमस्य च सर्वकारः सम्पूर्णे राज्ये कार्यं करोति। मानचित्राणि पश्यन्तु । राष्ट्रियस्तरस्य सर्वकारस्य सम्बन्धः सम्पूर्णदेशेन भवति। एतस्मिन् पुस्तके भवत्यः अग्रे पठिष्यन्ति यत् स्थानीयसर्वकारः कथं कार्यं करोति तथा च अग्रिमासु कक्षासु राज्यस्तरे राष्ट्रियस्तरे च सर्वकारस्य कार्याणां विषये पठिष्यन्ति ज्ञास्यन्ति च।




सूचना- आन्ध्रप्रदेशराज्यस्य पुनर्गठनानन्तरं जूनमासस्य द्वितीये दिङ्नाके तेलंगाना भारतस्य २९तमं राज्यं जातम्।




सूचना- आन्ध्रप्रदेशराज्यस्य पुनर्गठनानन्तरं जूनमासस्य द्वितीये दिङ्नाके तेलंगाना भारतस्य २९तमं राज्यं जातम् ।

**सर्वकारः अधिनियमः च**

सर्वकारः अधिनियमं रचयति अपि च देशे विद्यमानैः सर्वैः जनैः ते पालनीयाः भवन्ति। केवलम् एषः एव उपायः अस्ति येन सर्वकारः कार्यं कर्तुं शक्नोति। यथा सर्वकारस्य पार्श्वे अधिनियम-निर्माणस्य सामर्थ्यं भवति तथैव एषा शक्तिः अपि भवति यत् जनाः अधिनियमान् पालयितुं बाध्याः भवेयुः। उदाहरणार्थं यानचालकस्य पार्श्वे चालन-स्वीकृतिपत्रं स्यात्। यदि कश्चित् प्रमाणपत्रेण विना वाहनं चालयति तथा च सः आरक्षकैः गृह्यते तदा तेन कारगारस्य दण्डः स्वीकरणीयः भवति अथवा दण्डशुल्कः दातव्यः भवति।

कञ्चित् अधिनियमम् अधिकृत्य विचारयन्तु यत् जनानां कृते तस्य पालनं किमर्थम् आवश्यकम् अस्ति

सर्वकारः यादृशं क्रियान्वयनं कर्तुं शक्नोति तदतिरिच्य जनाः अनुभवन्ति यत् कस्यचित् अधिनियमस्य अनुपालनं सम्यक्प्रकारेण न भवति तदा ते अपि कानिचन कार्याणि कर्तुं शक्नुवन्ति। उदाहरणार्थं यदि जनः अनुभवेत् यत् तस्य धर्मस्य जातेः च कारणात् तस्य कस्मिंश्चित् उद्योगे चयनं न जातं तर्हि सः न्यायालयं गन्तुं शक्नोति तथा च तत्र वक्तुं शक्नोति यत् अधिनियमस्य पालनं न भवति। तदा न्यायालयः आदिक्ष्यति यत् कीदृशस्य समाधानस्य आवश्यकता अस्ति।

**सर्वकारस्य प्रकाराः**

सर्वकाराय निर्णयस्वीकरणस्य सामर्थ्यं तथा च अधिनियमान् पालयितुम् अर्थात् जनाः नियमान् पालयितुं बाध्याः भवेयुः एतादृशीं शक्तिं कः ददाति?



एतस्य प्रश्नस्य उत्तरम् एतस्मिन् विषये आश्रितम् अस्ति यत् तस्मिन् देशे कीदृशः सर्वकारः अस्ति।

लोकतन्त्रे तु जनाः एव सर्वकाराय एतादृशीं शक्तिं ददति। जनाः एतादृशं व्यवहारं निर्वाचनस्य माध्यमेन कुर्वन्ति। ते स्वस्य रुच्यनुगुणं नेतुः चयनं कृत्वा तस्मै मतदानं कुर्वन्ति एकदा चयनानन्तरम् एते जनाः सर्वकारस्य निर्माणं कुर्वन्ति। लोकतन्त्रे सर्वकारेण ये निर्णयाः स्वीक्रियन्ते अथवा यानि कार्याणि क्रियन्ते तेषाम् आधारः कः इति जनानां पुरतः वक्तव्यं भवति तथा च स्वस्य पक्षः अपि उपस्थापनीयः भवति।

कश्चित् अपरप्रकारकः सर्वकारः भवति सः राजतन्त्रीयः सर्वकारः इति उच्यते। एतस्मिन् राज्ञः राज्ञ्याः च समीपे निर्णयस्वीकरणस्य सर्वकारस्य सञ्चालनस्य च शक्तिः भवति राज्ञः पार्श्वे परामर्शदातॄणां कश्चित् समूहः भवति येन समूहेन सः

लोकतन्त्रे जनानां सहभागिता तेषां निर्णयानां स्वीकरणे महत्त्वपूर्णा अस्ति ये तान् प्रभावयन्ति। किं भवन्तः तेभ्यः सहमताः सन्ति ? स्वस्य उत्तरस्य कारणद्वयं लिखन्तु।

- भवतां क्षेत्रे यादृशी शासनव्यवस्था अस्ति तस्य स्थाने भवत्यः कीदृशीं शासनव्यवस्थाम् एषिष्यन्ति ? अपि च किमर्थम् ?
- अधोलिखित-कथनेषु ये दोषाः सन्ति तान् परिष्कृत्य लिखन्तु।
- राजतन्त्रे देशस्य जनानां कृते मुक्तता भवति ते इच्छानुसारं नेतुः चयनं कर्तुं शक्नुवन्ति।
- लोकतन्त्रे कस्यचित् राज्ञः पार्श्वे देशस्य उपरि शासनं कर्तुं सम्पूर्णा शक्तिः भवति।
- राजतन्त्रे राज्ञा राज्ञ्या च ये निर्णयाः स्वीकृताः तेषु निर्णयेषु जनाः प्रश्नान् कर्तुं शक्नुवन्ति।

विविधेषु विषयेषु चर्चां करोति। अन्तिमनिर्णयस्य शक्तिः राज्ञः पार्श्वे एव भवति लोकतन्त्रवत् राजतन्त्रे अपि राज्ञा राज्ञ्या च निर्णस्य कः आधारः इति विषये चर्चा न करणीया भवति न च स्वकीयानां निर्णयानां विषये स्वपक्षः उपस्थापनीयः भवति।

**लोकतन्त्र**

भारतं किञ्चित् लोकतन्त्रम् अस्ति। एतां लोकतन्त्रव्यवस्थां प्राप्तुम् अस्माभिः दीर्घकालिकः सङ्घर्षः कृतः। संसारे अन्ये अपि बहवः देशाः सन्ति यत्र जनैः लोकतन्त्रम् आनेतुं सङ्घर्षाः कृताः सन्ति। उपर्युक्तमस्ति यत् लोकतन्त्रस्य मुख्यविषयः अयम् अस्ति यत् जनानां पार्श्वे स्वनेतुः चयनस्य शक्तिः भवति। अतः एकस्मिन् अर्थे लोकतन्त्रं जनानामेव शासनं भवति।

लोकतन्त्रे मूलभूतविचारः अयम् अस्ति यत् जनाः नियमनिर्माणे सहभागिनः भूत्वा स्वयमेव शासनं कुर्युः। अद्यत्वे लोकतान्त्रिकसर्वकारः प्रायः प्रतिनिधिः लोकतन्त्रः उच्यते। प्रतिनिधि-लोकतन्त्रे जनाः प्रत्यक्षतः भागं न स्वीकुर्वन्ति अपितु निर्वाचनस्य प्रक्रियया स्वप्रतिनिधीन् चिन्वन्ति। एते प्रतिनिधयः मिलित्वा सम्पूर्ण-



मतदानकाले मतदातुः अङ्गुल्याः उपरि मश्याः चिह्नं क्रियते येन सः केवलं एकवारमेव मतदानं कर्तुं शक्नुयात्- ग्रामीणमतदान-केन्द्रस्य दृश्यम्।

जनतायै निर्णयान् स्वीकुर्वन्ति । अद्यत्वे कश्चिदपि सर्वकारः आत्मानं तावत्पर्यन्तं लोकतन्त्रम् इति न वक्तुं शक्नोति यावत्पर्यन्तं सर्वेषां वयस्कनागरिकाणां कृते मतदानस्य अधिकारं न दद्यात् ।

परन्तु सर्वकालतः एतादृशी व्यवस्था नासीत् किं भवत्यः विश्वसितुं शक्नुवन्ति यत् तादृशः अपि कालः आसीत् यदा लोकतान्त्रिक-सर्वकाराः महिलानां निर्धनानां च कृते निर्वाचने भागग्रहणात् वारयन्ति स्म ? स्वस्य आरम्भिके काले सर्वकाराः केवलं तेषां जनानां कृते एव मतदानस्य अधिकारं यच्छन्ति स्म ये शिक्षिताः भवन्ति स्म अपि च येषां पार्श्वे स्वसम्पत्तिः भवति स्म । एतस्य अभिप्रायः आसीत् यत् अशिक्षितानां निर्धनानां महिलानां च कृते मतदानस्य अधिकारः नासीत् । एतस्यां स्थितौ देशाः तेषां नियमानाम् आश्रयेण एव चलन्ति स्म यान् नियमान् एते अङ्गुल्यधिष्ठिताः जनाः एव निर्मान्ति स्म ।

भारते स्वतन्त्रतातः पूर्वं अल्पानां जनानां कृते एव मतदानस्य अधिकारः आसीत् । एतस्मात् कारणात् जनाः सम्भूय एतस्य अधिकारस्य विषये चर्चां याचनां च कृतवन्तः । गान्धिसहिताः अन्ये नेतारः एतस्य अन्यायपूर्णस्य व्यवहारस्य विरोधं कृतवन्तः । ते अपि दृढतया स्वयाचनां स्थापितवन्तः । १९३१ तमे वर्षे "यंग-इण्डिया-पत्रिकायां लिखन् गान्धिमहोदयः उक्तवान् आसीत्" यत् एतादृशं विचारं न सोढुं शक्नोमि यत् यस्य जनस्य पार्श्वे सम्पत्तिः अस्ति सः मतदानं कर्तुं शक्नोति परन्तु यः जनः यस्य पार्श्वे चरित्रमस्ति परन्तु सम्पत्तिः नास्ति शिक्षा वा नास्ति सः मतदानं न कर्तुं शक्नोति अथवा यः आदिनं दृढपरिश्रमं कृत्वा सत्यतया कार्यं करोति सः मतदानं न कर्तुं शक्नोति यतो हि तस्य दोषः एषः अस्ति यत् सः निर्धनः अस्ति.... ।"




संसारे कुत्रापि सर्वकारैः स्वेच्छया स्वशक्तिः जनैः सह न विभाजिता। सम्पूर्णे यूरोपे अमेरिकायां च महिलाः निर्धनाः च सर्वकारस्य कार्येषु सहभागितां ग्रहीतुं सङ्घर्षं कृतवन्तः। महिलाभिः मताधिकारस्य कृते कृतसङ्घर्षेण प्रथम-विश्वयुद्धस्य काले इतोऽपि दृढता दर्शिता एतस्य आन्दोलनस्य नाम महिला-मताधिकारान्दोलनम् अस्ति तथा च आङ्ग्लभाषायाम् एतत् "सफ्रेज मूवमेंट" इति उच्यते। 'सफ्रेज' इत्यस्य आङ्ग्लशब्दस्य अर्थः भवति मतदानस्य अधिकारः। युद्धकाले बहवः पुरुषाः युद्धे संलग्नाः आसन् अतः महिलाः तानि कार्याणि कर्तुम् आहूताः यानि कार्याणि पूर्वं पुरुषाः कुर्वन्ति स्म यदा महिलाः विभिन्नानि कार्याणि कर्तुं तेषां योद्धॄणां व्यवस्थां च कर्तुम् आरब्धवत्यः तदा जनाः एदद् कथयित्वा महान्तम् आश्चर्यं प्रकटितवन्तः यत् ते किमर्थं महिलानां विषये एतादृशीः रूढिबद्ध-धारणाः धारणाः स्वमनसि स्थापितवन्तः आसन् यत् महिलाः एतादृशानि कार्याणि न कर्तुं शक्नुवन्ति। अनेन प्रकारेण महिलाः अपि निर्णयान् स्वीकर्तुं शक्नुवत्यः महिलाधिकारान्दोलनस्य सर्वाभिः माहिलाभिः स्वसखी-भावसम्पन्न-महिलाभिः च महिलानां मतदानस्य अधिकारस्य चर्चा कृता। तासां याचनायाः उपरि चिन्तनं स्यात् एतदर्थं ताः लौहशृङ्खलाभिः आत्मनः बन्धनं कृत्वा प्रदर्शनं कृतवत्यः। एतासु बह्व्यः क्रान्तिकारिण्यः महिलाः कारागारमपि गतवत्यः तथा च अनशनव्रतमपि पालितवत्यः। अमेरिकायां महिलाः मतदानस्य अधिकारं १९२० तमे वर्षे प्राप्तवत्यः अपि च इंग्लैडदेशस्य महिलाः इमम् अधिकारं कानिचनवर्षानन्तरं १९२८ तमे वर्षे प्राप्तवत्यः।

३३ पृष्ठे ३४ पृष्ठे च मानचित्राणि पश्यतु। तानि भारतस्य राज्यानि केन्द्रशासितप्रदेशान् अपि च जनपदान् दर्शयन्ति। एतैः मानचित्रैः विभिन्नसंसाधनैः च निम्नलिखितायाः सूचनायाः विषये जानन्तु।

- भारतस्य प्रतिवेशिदेशानां नामानि
- स्वराज्यस्य अथवा केन्द्रशासितप्रदेशस्य तथा च तेषां प्रतिवेशिनां नामानि
- स्वजनपस्य तस्य च प्रतिवेशिजनपदानां नामानि
- स्वजनपदात् राष्ट्रियराजधान्याः कृते गमनशीलः मार्गः

अधोलिखिततालिकायां प्रदत्तकथनानाम् उपरि दृष्टिपातं कुर्वन्तु। किं भवत्यः परिचेतुं शक्नुवन्ति यत् ते सर्वकारस्य केन स्तरेण सम्बन्धिताः सन्ति ? तेषां पुरतः चिह्नं कुर्वन्तु।

| | स्थानीयः | राज्यम् | राष्ट्रियः |
|---|---|---|---|
| भारतसर्वकारस्य रूसदेशेन सह मैत्री-सम्बन्ध-स्थापनस्य निर्णयः | O | O | O |
| पश्चिमबंगालसर्वकारस्य सर्वेषु सर्वकारीयेषु विद्यालयेषु अष्टमकक्षायां परिषदः परीक्षां स्वीकर्तुं निर्णयः | O | O | O |
| डिब्रूगढं कन्याकुमारीं चान्तरा नूतनरेलसेवाः प्रारम्भस्य निर्णयः | O | O | O |
| ग्रामे कस्यचित् सार्वजनिककूपस्य स्थानचयननिर्णयः | O | O | O |
| पटनायां बालकानां कृते बृहद्‌द्यान-निर्माणस्य निर्णयः | O | O | O |
| हरियाणासर्वकारस्य सर्वेषां कृषकाणां कृते निःशुल्करूपेण विद्युद्दानस्य निर्णयः | O | O | O |
| | O | O | O |
| १००० रुप्यकाणां नूतनमुद्राप्रारम्भस्य निर्णयः | O | O | O |

अभ्यासः

१. भवत्यः "सर्वकारः" इति शब्दात् किम् अवगच्छन्ति? एकां सूचीं कुर्वन्तु यत् केन प्रकारेण सर्वकारः भवतीनां जीवनं प्रभावयति।

२. सर्वकाराय अधिनियमस्य रूपेण सर्वेषां कृते नियम-निर्माणस्य का आवश्यकता अस्ति?

३. लोकतान्त्रिक-सर्वकारस्य आवश्यकलक्षणानि कानि सन्ति ?

४. महिला-मताधिकारान्दोलनं किम् अस्ति? तस्य उपलब्धिः का आसीत् ?

५. गान्धिनः दृढविश्वासः आसीत् यत् भारते प्रत्येकं वयस्कस्य कृते मतदानस्य अधिकारः लभेत। परन्तु बहवः जनाः तस्य विचारेभ्यः सहमताः न सन्ति। बहवः जनाः अनुभवन्ति यत् ये जनाः अशिक्षिताः निर्धनाः च जनाः सन्ति तेषां कृते मतदानस्य अधिकारः न स्यात्। भवतीनां कः विचारः अस्ति ? किं भवन्तः अनुभवन्ति यत् इदं भेदभावस्य रूपं भविष्यति ?